पितृदेवे तथा सौम्ये धान्यच्छेदं मृगोदये।"

अथ धान्यच्छेदप्रकारः।

"अपक्वौ माषमुद्गौ च यवधान्ये सकाण्डके !
छिन्द्यात्तिलञ्च निष्पन्नमेतत् पाराशरं मतम् ॥"

पराशरः।

"न मुष्टिग्रहणं कुर्य्यात् कदाचिद्वटपौषयोः।
ईशाने लवनं कुर्य्यात् सार्द्धमुष्टिद्वयं शुचिः ॥
पौष्णे पुष्ये शुभाहे वा पूजयित्वेष्टदेवताम्।
शस्यविघ्नप्रशान्त्यर्थं क्षेत्रे वाहकभोजनम् ॥"

बौधायनः।

"रथाश्वगजधान्यानां गवां चैव रजः शुभम्।
अथाशस्तं समूहिन्याः श्वाजाविखरवाय-
साम् ॥"

समूहिनी संमार्ज्जनी ॥ * ॥ कृत्यचिन्तामणौ मेधिरोपणम्।

वटश्च सप्तपर्णश्च गम्भारी शाल्मली तथा।
अौडुम्बरी तथा धात्री या चान्या क्षीर-
धारिणी।
क्षीनाम्नी कर्षकैर्नित्यं मेधिः कार्य्या फलप्रदा॥"

बीजसञ्चयदिनादि तच्छब्दे द्रष्टव्यम् ॥ * ॥ * ॥

अथ प्रयोगः।

पौर्णमास्यन्तचैत्रीयकृष्णपञ्चम्यां पृथ्वी रजस्वला तां दिनत्रयमेकस्मिन् पर्व्वताकारे उच्चप्रदेशे सधवाः स्त्रियः प्रपूजयेयुरष्टम्यां तां स्नापयित्वा ताः पूजयेयुः। ततः शुभदिने बीजवपनदिने वा सर्व्वौषधिगन्धबीजरत्नफलश्वेतसर्षपैः पृथ्वीं स्नापयित्वा गन्धादिभिः पूजयेत्। नैवेद्यशेषञ्च पश्चाद्भोक्तव्यम् ॥*॥ अथ हलप्रवाहदिने बीजवपनदिने च कृतस्नानादिराचान्तो गर्त्तं क्षेत्रे कृत्वा जलेनापूर्य्य तत्र प्रजापतिं सूर्य्यादिनवग्रहान् पृथ्वीञ्च पूजयेत्।

"हिरण्यगर्भे वसुधे शेषस्योपरिशायिनि।
वसाम्यहं तव पृष्ठे गृहाणार्घ्यं धरित्रि मे ॥"

इति मन्त्रेण क्षीरेणार्घ्यं दद्यात्। ऐशान्यां पुष्पनैवेद्यैः प्रणवादिनमोऽन्तेन ब्रह्मणे विष्णवे। नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा ॥ इत्यनेन त्रिः पूजयेत्। रुद्राय कश्यपाय सुरभ्यै इन्द्राय। तदर्घ्यमन्त्रस्तु।

"शक्रः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः।
शतयज्ञाधिपो देव तुभ्यमिन्द्राय वै नमः ॥"

प्रचेतसे पर्ज्जन्याय शेषाय चन्द्राय अर्काय वह्नये बलदेवाय हलाय भूमये वृषभाय रामाय लक्ष्मणाय जानक्यै सीतायै युगाय गगनाय इति द्वाविंशतिं पूजयेत् क्षेत्रपालमग्निं द्विजञ्च पूजयेत्। अग्निं प्रदक्षिणीकृत्य ब्राह्मणाय दक्षिणां दद्यात्। आम्रपल्लवौदनदधीनि गर्त्ते निःक्षिप्य मृत्तिकाभिः पूरयेत्। कृष्णौ वृषौ नवनीतेर्घृतेन वा मुखपार्श्वयोर्निर्लिम्पेत्। हलप्रवाहकान् गन्धादिना भूषयित्वा हलं माल्यादिभिः पूजयित्वा दधिघृतमधुभिः फालाग्रं प्रलिप्य हेम्ना फालाग्रं घर्षयित्वा कर्षयेत्। वसिष्ठेन्द्रपृथुरामेन्दुपराशरबलभद्रान् स्मरेत्। एका तिस्रः पञ्च वा रेखा हलेन कार्य्याः। भग्नशृङ्गखुरलाङ्गूलाः कपिलाश्च वृषा न योक्तव्याः। हलप्रवाहकाश्च समर्थाः कर्त्तव्याः। हलानि नवानि दृढ़ानि कर्त्तव्यानि। वृषभयुद्धादिकं न शुभदं वृषभाणां नर्द्दनेन चतुर्गुणं शस्य मूत्रपुरीषोत्सर्गे तथा ॥ * ॥ बीजवपने त्विदमधिकम्। सुवर्णजलसंयुक्तं बीजमुष्टित्रयं इन्द्रं ध्यायन् स्वयं प्राजापत्येन तीर्थेन वपेत्। उभयत्रैव प्राङ्मुखः जलपूर्णं कलसं गृहीत्वा।

"त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु ॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु।
कर्षकास्तु भवन्त्वग्र्या धान्येन च धनेन च
स्वाहेति प्रार्थयेदिति ॥"

इति ज्योतिस्तत्त्वम् ॥ * ॥

अपि च।

"अमावस्यां पितृश्राद्धे अम्बुवाचीदिने तथा।
लाङ्गलेन क्षतं चेत्तं पृथिवी कम्पते सदा ॥"

इति कर्म्मलोचनम् ॥ * ॥

स्मृतिसागरसारे गोभिलः।

"हलैर्व्वा शकटैर्व्वापि वाहयेत् यो वृषं स्वयम्।
प्राजापत्यद्वयं कुर्य्यात् द्विगुणं योषितां गवाम् ॥
वृषभन्तु समुत्सृष्टं कपिलां वापि कामतः ॥
योजयित्वा हले कुर्य्यात् व्रतं चान्द्रायणद्वयम् ॥"

इति तिथ्यादितत्त्वम् ॥

हलद्दी, स्त्री, हरिद्रा। इति राजनिर्घण्टः ॥

हलधरः, पुं, (धरतीति। धृ+अच्। हलस्य धरः।) बलदेवः। यथा,—

"नीलाम्बरो हलधरो हलश्चालभृत् बलः ॥"

इति शब्दरत्नावली ॥

(यथा च महाभारते। १। २२०। ७।

"ततो हलधरः क्षीबो रेवतीसहितः प्रभुः।
अनुगम्यमानो गन्धर्व्वैरचरत्तत्र भारत ! ॥")

हालिकः। यथा, ज्योतिस्तत्त्वे।

"सालङ्कारो हलधरः स्रग्भिश्च पूजितं हलम् ॥"

हलभूतिः, स्त्री, (हलसाध्या भूतिः।) कृषिकर्म्म। यथा,—

"अथ सेवा श्ववृत्तिः स्यात् स्त्रियां कृषिश्च
कर्षणम्।
कर्षोऽमृतञ्च प्रकृतं हलभूतिर्महाधनम् ॥"

इति शब्दरत्नावली ॥"

हलभृत्, पुं, (हलं बिभर्त्तीति। भृ+क्विप्। हलस्य भृदिति वा।) बलदेवः। इति त्रिकाण्डशेषः ॥ (यथा, मेघदूते। ६१।

"अंसन्यस्ते सति हलभृतो मेचके वाससीव ॥")

हलभृतिः, पुं, (हलेन भृतिर्भरणमस्य।) मुनिविशेषः। तत्पर्य्यायः। उपवर्षः २ कृतकोटिः ३ अयाचितः ४। इति त्रिकाण्डशेषः ॥ (हलस्य हलेन वा भृतिः।) कृषिकर्म्म च ॥

हलराध्वं, क्ली, आहुल्यम्। इति राजनिर्घण्टः ॥

हला, व्य, नाट्योक्तौ सखीं प्रत्याह्वानम्। इत्यमरः। १। ७। १५ ॥

हला, स्त्री, सखी,। इति जटाधरः ॥ मद्यम्। पृथिवी। जलम्। इत्यनेकार्थकोषः ॥

हलायुधः, पुं, (हलमायुधं यस्य।) बलदेवः। इत्यमरः। १। १। २४ ॥ (यथा, महाभारते। १। २२१। २३।

"ततस्ते तद्वचः श्रुत्वा ग्राह्यरूपं हलायुधात्।
तूष्णींभूतास्ततः सर्व्वे साधु साध्विति चाब्रुवन् ॥")

हलाहः, पुं, चित्रिताश्वः। इति हेमचन्द्रः ॥

हलाहलः, पु, (हलमिव आ समन्तात् सर्व्वाङ्गेषु हलति कर्षतीति। आ+हल+अच्।) विषभेदः। यथा,—

"सर्पौ कञ्चुकनिर्म्मोकौ क्ष्वेड़स्तु गरलं विषम्।
पुंसि क्लीवे च काकोलकालकूटहलाहलाः ॥"

इत्यमरः। १। ८। १० ॥

हलमिव आ समन्तात् हलति विलिखति हलाहलः। हलज विलेखे अच् स्वार्थे अणि हालाहलश्च। निपातनात् ललोपे हाहलश्च।

"हालाहलं हालहलं हाहलञ्च हलाहलम् ॥"

इति रुद्रः ॥

एते काकोलादयस्त्रयः पुंसि क्लीवे चेत्यन्वयः। केचित्तु क्ष्वेड़भेदा इति पुंस्त्वे पञ्चमाणत्वात् पुंसि क्लीवे चेत्यस्य विषमित्यनेन सम्बन्धः। इत्याहुः। तन्नातिहृद्यम्।

"काकोलसुग्रतेजः स्यात् कृष्णच्छवि महा-
विषम्।"

इति वैद्यकम्।

"तत् कालकूटं विषमुग्रतेजः
कण्ठे धृतं पर्व्वतराजकन्ये ॥"

इति व्यासः ॥

हालाहलं विषमिव प्रगुणं तदेव इति वामनः ॥

"मधु तिष्ठति वाचि योषितां हृदये हलाहलं
महद्विषम्।
अतएव निपीयतेऽधरो हृदयं मुष्टिभिरेव
ताड्यते ॥"

इति कुलचरितेऽश्वघोषः। इति भरतः ॥

(मूलजविषभेदः।

"सङ्कोचं मर्कटं शृङ्गिविषं हलाहलन्तथा।
एवमादीनि चान्यानि मूलजानि स्थिराणि च ॥"

इति चरके चिकित्सास्थाने २५ अध्याये ॥)

हलाहलः, पुं, (हलाहलोऽस्यास्तीति।) अच्।) ब्रह्मसर्पः। अञ्जना। इति मेदिनी ॥ बुद्धविशेषः। इति त्रिकाण्डशेषः ॥

हलिः, पुं, (हलति कर्षति भूमिमिति। हल+"सर्व्वधातुभ्य इन्।" उणा० ४। ११७। इति इन्। वृहद्धलम्। इति शब्दरत्नावली ॥ तत्पर्य्यायः। जित्या २। इति हेमचन्द्रः ॥

हलिनी, स्त्री, (हलमिव आकारोऽस्त्यस्या इति। इनिः। ङीप्।) लाङ्गलिकीवृक्षः। विषलाङ्गला इति भाषा इति रत्नमाला ॥ (पर्य्यायोऽस्य यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

"कलिहारी तु हलिनी लाङ्गली शक्रपुष्प्यपि।
विशल्याग्निशिखानन्ता वह्निवक्त्रा च गर्भनुत ॥"